दैनिकं ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ताः
हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः
himsanskritvartah
e-Sanskritnewspaper
नवा प्रेरणा नवोत्साहः
■ पृष्ठ-4 ■ वर्ष-4 ■ अङ्क-16
1 16.11.2024 शनिवासरः वि.सं. २०८१ मार्गशीर्षकृष्णप्रतिपदा मार्गशीर्ष 1 प्रविष्टांशः
Website- www.himsanskritam.com Email-himsanskrit@gmail.com

## श्रीलङ्कादेशस्य राष्ट्रियजनशक्तिदलं (NPP) इति निर्वाचने विजयं प्राप्तवत्

हिमसंस्कृतवार्ताः। श्रीलङ्कादेशस्य सत्ताधारिः राष्ट्रियजनशक्तिदलं (NPP) इति निर्वाचने विजयं प्राप्तवत्। पञ्चविंशत्युत्तरद्विशत- सदस्यीयनिर्वाचने बहुमतस्य अङ्कं पारं कृत्वा दलेन अनेन वैजयन्ती सम्प्राप्ता। अद्यावधि एकोनाशीत्युत्तरैकशतासनानां कृते घोषितपरिणामानां मध्ये वामपक्षीयसङ्घटनेन एकचत्वारिंशदुत्तरैकशतम् आसनानि विजितानि सन्ति। अन्येषां कृते मतगणना अधुना अपि प्रर्तते। साजिथप्रेमदासस्य नेतृत्वे मुख्यविपक्षेण अद्यावधि पञ्चत्रिंशद् आसनानि विजितानि। इलङ्काई तमिल अरसु कड्चीदलेन सप्त आसनानि विजितानि।

## बोडोलैण्डमहोत्सवस्य उद्घाटनं कृतवान् प्रधानमंत्री

हिमसंस्कृतवार्ताः। प्रधानमन्त्री नरेन्द्र मोदी गतसायंकाले नवदिल्लीनगरे प्रथमस्य बोडोलैण्डमहोत्सवस्य उद्घाटनं कृतवान्। द्विदिवसीयः अयं महोत्सवः शान्तिं स्थापयितुं, बोडो-समाजस्य निर्माणार्थं च भाषा-साहित्य-संस्कृतेः च विषये एकः महत्-कार्यक्रमः अस्ति। प्रधानमन्त्रिकार्यालयेन विज्ञप्तौ उक्तं यत् महोत्सवस्य उद्देश्यं न केवलं बोडोलैण्ड्-प्रदेशे अपितु असमस्य अन्येषु भागेषु, पश्चिमबङ्गस्य, नेपालस्य, पूर्वोत्तरस्य अन्येषु अन्ताराष्ट्रियसीमाक्षेत्रेषु च निवसतः आदिवानः बोडोजनान् एकीकृत्य संस्थापनं वर्तते। महोत्सवस्य विषयः 'समृद्धभारतस्य शान्तिः सौहार्द च'इति।

## केन्द्रीयशिक्षामन्त्रिणा शून्यत्रुटिप्रवेशपरीक्षाव्यवस्थायाः सर्वकारस्य प्रतिबद्धतायाः पुनः पुष्टिः कृता

हिमसंस्कृतवार्ताः। केन्द्रीयशिक्षामन्त्रिणा धर्मेन्द्रप्रधानेन छात्राणां कृते शून्यत्रुटिप्रवेशपरीक्षाव्यवस्थायाः सर्वकारस्य प्रतिबद्धतायाः पुनः पुष्टिः कृता। दक्षिणे तेलङ्गानाराज्ये हैदराबादनगरे इण्डियनस्कूल आफ् बिजनेस (ISB) इत्यनेन आयोजितस्य द्वितीयस्य अन्वेषणमञ्चस्य पार्श्वे वार्ताहरैः सह संवादे प्रधानमहोदयः अवदत् यत्, डॉ. राधाकृष्णसमित्या अनुशंसितस्य बहु- आयामी परिष्काराः सम्प्रति सन्ति वीक्षाधीनाः। सः अवदत् यत्, ISB इत्यादिभिः संस्थाभिः कृतं शोधकार्यं सार्वजनिकनीतिनिर्माणे सहायकं भविष्यति तथा च विभिन्नस्तरेषु शासनस्य सहायतां करिष्यति।

## अमितशाहः भगवतः बिरसामुण्डा इत्यस्य प्रतिमायाः अनावरणं कृतवान्

हिमसंस्कृतवार्ताः। केन्द्रीयः गृहमन्त्री अमितशाहः नवदिल्लीनगरस्य बान्सेरापार्क इत्यस्मिन् स्थाने भगवतः बिरसामुण्डा इत्यस्य प्रतिमायाः अनावरणं कृतवान्, यत्र हि महतः स्वतन्त्रतासेनानिनः सम्मानं कृतम्। आयोजने श्रीशाहः उक्तवान् यत् भगवान् बिरसा मुण्डा राष्ट्राय स्वकीयम् अपारं योगदानं कृतवान्। सः एवमपि अवदत् यत् बिरसा मुण्डा इत्यनेन आदिवासीसमुदायेषु जलस्य, भूमेः, वनानां च महत्त्वस्य विषये जागरूकता उत्पादिता।

## प्रधानमन्त्रिणा बिहारस्य जमुय्यां विभिन्नानां विकासपरियोजनानां लोकार्पणं शिलान्यासं च विहितम्




हिमसंस्कृतवार्ताः। प्रधानमन्त्री नरेन्द्रमोदी बिहारस्य जमुय्यां जनजातीयगौरवदिवसस्य अवसरे षड्शतोत्तरषट्सहस्र-कोटितोप्यधिकरुप्यकाणां विभिन्नानां विकासपरियोजनानां लोकार्पणं शिलान्यासं च विहितम्। अस्मिन् अवसरे तेनोक्तं यत् एतासां परियोजनानाम् उदेश्यं जनजातीयसमुदायानाम् उत्थानं ग्राम्यजीवनस्तरे च औन्नत्यम् अस्ति

## झारखण्डनिर्वाचनम्- राजनाथसिंहेन कृता हेमन्तसोरेनस्य आलोचना, राहुलगान्धिनः प्रतिज्ञा पूर्त्यर्थं स्वीकृतं संकल्पम्

हिमसंस्कृतवार्ताः। धनबादस्य टुण्डीनगरे नैर्वाचनिकसभां सम्बोधयन् भाजपादलस्य वरिष्ठनेता तथा च केन्द्रीय मन्त्री राजनाथसिंहः राज्ये प्रचण्डभ्रष्टाचाराय झारखण्डमुक्तिमोर्चादलस्य मुख्यमन्त्रिणः हेमन्तसोरेनस्य आलोचनां कृतवान्। भाजपा वरिष्ठनेतारः शिवराजसिंहचौहानः, हिमन्तविश्वसर्मा, चम्पाई सोरेनः च डुमका-पाकुर-जामा-नगरेषु सभाः सम्बोधितवन्तः । गोड्डानगरे जनसभायां काङ्ग्रेसदलस्य वरिष्ठनेता राहुलगान्धी प्रतिज्ञां कृतवान् यत् यदि I.N.D.I.A घटबन्धनं सत्तां प्राप्स्यति तर्हि दलद्वारा कृताः सर्वाः प्रतिज्ञाः पूर्णाः भविष्यन्ति। इतरथा देवघरे सभायां राजददलस्य वरिष्ठनेता तेजस्वीप्रसादयादवः उक्तवान् यत् भाजपादलं धार्मिकजातिपङ्क्तौ समाजस्य विभाजनं करोति। अजसु-पक्षस्य वामपक्षीयदलानां च नेतारः अपि सक्रियरूपेण प्रचारं कुर्वन्ति, राज्यस्य विभिन्नेषु भागेषु सभाः, मार्गप्रदर्शनं च कुर्वन्ति । द्वितीयचरणे झारखण्डे अस्मिन् मासे २० दिनाङ्के अष्टत्रिंशद् आसनानां कृते मतदानं भविष्यति।

## S&P- उत्तमाः आर्थिकाश्च सम्भावनाः भारतस्य वित्तीयसंस्थानां तन्यतायाः समर्थनं करिष्यन्ति

हिमसंस्कृतवार्ताः। S&P- ग्लोबल इत्यनेन भारतस्य सकलराष्ट्रिय-उत्पादप्रतिशततायां सप्त विंशत्युत्तर द्विसहस्र वर्षं यावत् आगामिषु वित्तवर्षेषु प्रतिवर्षं ६.५ तः ७ प्रतिशतं वृद्धिः भविष्यति इति अनुमानितम् अस्ति। एस एण्ड पी ग्लोबल रेटिंग्स् इत्यनेन नवीनतमप्रतिवेदने उक्तं यत्, संरचनात्मकपरिष्काराः उत्तमाः आर्थिकाश्च सम्भावनाः भारतस्य वित्तीयसंस्थानां तन्यतायाः समर्थनं करिष्यन्ति। संस्थया स्वस्य वैश्विकवित्तकोषदृष्टिकोणप्रतिवेदने प्रकाशितं यत् महर्षतावृद्ध्या सह सशक्त वित्त कोष द्रव्य वर्धनेन सह ऋणदानम् अपि वर्धनीयम्।

## महाराष्ट्रगुजराते च प्रवर्तननिदेशालयेन षोडशतः अपि अधिकेषु स्थानेषु अन्वेषणं कृतम्

हिमसंस्कृतवार्ताः। प्रवर्तननिदेशालयेन परह्यः सम्पूर्ण महाराष्ट्रगुजराते च षोडशतः अपि अधिकेषु स्थानेषु अन्वेषणं कृतम्, यत्र प्रायः नवतिकोटिरूप्यकाणां संशितिपूर्णस्य वित्तव्यवहारस्य अन्वेषणं कृतम्, यत् कथितं यत् मालेगांव-नगरस्य व्यापारिणा दुरुपयोगितबैङ्कखातानां माध्यमेन कृतम् एजन्सीस्रोतानां अनुसारं छापेमारीषु एजन्सी इत्यनेन द्वयोः संवीक्षितवैङ्कखातयोः धारितानि प्रायः १.८ कोटिरूप्यकाणि स्थगितानि।

## सुभाषितम्

बिभेह्यालोचनाभ्यो मा कारणं प्रखरातपः।
शोषयितुं समर्थो न भवेत् कदापि सागरम्।।

अर्थात्- मनुष्य को कभी भी आलोचना से डरना नहीं चाहिए, क्योंकि कितनी भी प्रखर धूप हो, वह सागर को सुखाने में समर्थ नहीं होती।

प्रतिदिनं नवीनतमं हिमसंस्कृतवार्ताः दैनिकवार्तापत्रं प्राप्तुं 7876636263 Watsapp संख्या मध्ये नमो नमः लिखन्तु

To get the latest himsanskritvartah Daily Sanskrit Newspaper every day, write Hello on 7876636263 Watsapp number

**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**

कार्यालयः
**हिमसंस्कृतम् प्रकाशनम्**
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

## समस्तदेशे मानितः गुरुनानकजयन्त्युत्सवः

हिमसंस्कृतवार्ताः। गुरुनानकजयन्त्युत्सवः गुरुपूरब् इति पर्व आदेशे धार्मिकोत्साहेन परिपाल्यते। समग्रे देशे विश्वस्मिन् च गुरुनानकजयन्त्युत्सवः गुरुपूरब् इति पर्व आदेशे धार्मिकोत्साहेन परिपालितः। दिवसोयं प्रथमस्य सिक्खगुरोः गुरुनानकदेवस्य प्राकट्योत्सवत्वेन आमन्यते। यः सिक्खधर्मस्य स्थापनां कृतवान्। अस्मिन् वर्षे श्रीगुरुनानकदेवस्य पञ्चपञ्चाशदुत्तरपञ्चशततमा जन्मजयन्ती भक्तैः परिपाल्यते। सम्पूर्ण विश्वस्मिन् अस्मिन् दिने सिक्खभक्ताः प्रातःकाले शोभायात्राभिः दिवसस्य आरम्भं कुर्वन्ति, गुरुद्वारा इत्येतेषु प्रार्थनाः आयोजितवन्तः।। सामुदायिकपाकशालाः, गुरुनानकस्य समानता, सेवा, करुणा चेति शिक्षाणां अभिव्यक्तिरूपेण सहस्रशो जनानां कृते भोजनस्य व्यवस्थां कृतवन्तः।

# अन्ताराष्ट्रीयलवीमेलापके मुख्यमंत्रिणा सुखविन्दरसिंहसुक्खुना कृतं वस्तूनां क्रयणम्



हिमसंस्कृतवार्ताः - रामपुरम्। मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः रामपुरे लवीमेलायां ८९०० रुप्यकाणां क्रयणं कृतवान्। अन्ताराष्ट्रीय-लवीमेला- समापनसमारोहे भागं गृहीत्वा मुख्यमन्त्री अस्मिन् अवसरे स्थापितानां विविधानां प्रदर्शनीनां स्तम्भानां निरीक्षणं कृतवान्। मुख्यमन्त्री हस्तशिल्पपदार्थानां, शुष्कफलानां च स्तम्भे स्थगितवान्। सः महिलाविक्रेतुः उत्पादानां विषये सूचनां प्राप्य एककिलोग्रामं अक्षोटं (अखरोट), एकम् ऊर्णकम्बलं (दोहड़ू) च क्रीतवान्। मुख्यमन्त्री गूगल- पे- माध्यमेन कम्बलस्य कृते ८,००० रूप्यकाणि, अक्षोटस्य कृते ९०० रूप्यकाणि च दत्तवान्। मुख्यमंत्री सुखविंदरसिंहसुक्खुः अवदत् यत् राज्यसर्वकारः हस्तकरघा उत्पादानाम् प्रचारं कुर्वन् अस्ति, ये न केवलं व्यावसायिकवस्तूनि अपि तु राज्यस्य समृद्धसंस्कृतेः प्रतीकाः अपि सन्ति। सः अवदत् यत् लवी इत्यादयः मेलापकाः न केवलम् उत्सवाः अपि तु भ्रातृत्वस्य सद्भावनायाः च प्रतीकाः सन्ति, येषां शताब्दपुराणः इतिहासः अस्ति। सः अवदत् यत् राज्यसर्वकारः ग्रामीण- अर्थव्यवस्थायाः सुदृढीकरणाय निरन्तरं प्रयत्नान् कुर्वन् अस्ति, विगतवर्षद्वये च अस्मिन् विषये अनेके उपक्रमाः कृताः सन्ति, भविष्ये च एतेषां प्रयत्नानाम् अधिकां त्वरिततां कर्तुं योजनाः सन्ति।

# नालागढ़स्य चिकित्सोपकरणवाटिकायां निवेशं करिष्यन्ति विदेशीयकम्पन्यः



हिमसंस्कृतवार्ताः - शिमला। जर्मनीदेशस्य डसेलडोर्फ-नगरे आयोजिते मेडिकलएक्स्पो मेडिका-२०२४ इत्यस्मिन् हिमाचले निवेशार्थं बहुभिः विदेशीय-कम्पनीभिः सह सम्बन्धः कृतः अस्ति अस्य एक्स्पो इत्यस्य चतुर्थे दिने उद्योगमन्त्री हर्षवर्धनसिंहचौहानस्य नेतृत्वे हिमाचलस्य दलेन चिकित्सासाधनक्षेत्रस्य विशेषज्ञैः सह वार्तालापः कृतः। उद्योगमन्त्री अधिकारिणां दलेन सह जापान-इजरायल-दक्षिणकोरिया-देशानां मण्डपयोः भ्रमणं कृतवान् ततः भारतस्य मण्डपस्य अपि भ्रमणं कृतवान् । इदानीं प्रायः सप्तकम्पन्यः नालागढे प्रस्ताविते चिकित्सोपकरणवाटिकायां निवेशं कर्तुं इच्छां प्रकटितवन्तः। उद्योगमन्त्री एतेषां कम्पनीनां मुख्याधिकारिभिः सह विविधविषयेषु चर्चां कृतवान्। इतरथा हर्षवर्धनसिंहचौहानः हिमाचले समर्पितं चिकित्सासाधनक्षेत्रं निर्मातुं सहमतिम् अददत् । एतत् निर्णयं स्वीकृत्य हिमाचलं चिकित्सायन्त्रक्षेत्रे निवेशस्य प्रमुखं गन्तव्यं भविष्यति। एतेन सह राज्यस्वास्थ्यसेवापरामर्शदातुः सङ्घटनस्य परामर्शः अपि प्राप्तः अस्ति । उद्योगमन्त्रिणा सह वार्तालापं कृत्वा विभिन्नानां कम्पनीनां मुख्याधिकारिणः हिमाचलस्य भ्रमणस्य रुचिं प्रकटितवन्तः। ततः पूर्वं वृत्तोपीठिकासम्मेलने चिकित्साक्षेत्रस्य निवेशकानां कृते आग्रहः कृतः यत् हिमाचले चिकित्सायन्त्रक्षेत्रस्य कृते पृथक् नियामकप्राधिकरणं निर्मातव्यम् इति। अपि च "मेड इन इण्डिया" इति क्रयणनीतेः अन्तर्गतं आयातानां प्राथमिकता प्राप्तव्या। उद्योगमन्त्री हर्षवर्धनसिंहचौहानः निवेशकान् आश्वासितवान् यत् निकासीम् अवलोक्य चिकित्सासाधनक्षेत्रस्य कृते पृथक् नियामकपक्षः निर्मितः भविष्यति तथा च क्रयणनीतिः अपि भिन्ना भविष्यति। उद्योगमन्त्री उक्तवान् यत् राज्यसर्वकारः प्रचुरौषधवाटिकायां बल्क ड्रग पार्क् इत्यत्र वापि अनुकूलितसंकुलं प्रदाति, स्वास्थ्यसेवाक्षेत्रे उत्कृष्टताकेन्द्रस्य स्थापनायां च बलं ददाति। हिमाचलतः उद्योगमन्त्रिणः नेतृत्वे प्रतिनिधिमण्डले चत्वारः काङ्ग्रेसविधायकाः भुवनेश्वरगौड़, सुरेशकुमारः, मलेन्द्रराजनः, विनोदसुल्तानपुरी च सन्ति।

# हिमाचले गृहवासाय (होम स्टे) पञ्जीकरणं अनिवार्यम्, नियमपरिवर्तनार्थं सर्वकारः सज्जः अस्ति; मन्त्रिमण्डलसभायां भविष्यति निर्णयः




हिमसंस्कृतवार्ताः- कार्यालयीयः प्रतिनिधिः। हिमाचले गृहवासस्य नियमेषु परिवर्तनं कर्तुं सर्वकारः गच्छति। शनिवासरे राज्यमन्त्रिमण्डलस्य सभायाम् एतस्य विषये चर्चा भविष्यति। सभा प्रातः ११ वादने आरभ्यते। अयं प्रस्तावः २२ अक्तूबर दिनाङ्के आयोजिते मन्त्रिमण्डलस्य सत्रे अपि पर्यटनविभागेन प्रेषितः। अस्मिन् विषये मन्त्रिमण्डलेन काश्चन अधिका सूचना याचिता आसीत्, यस्मात् कारणात् पुनः अस्मिन् सत्रे स्थापिता अस्ति। सूत्रानुसारं गृहवासार्थं निर्मितानां नूतननियमानुसारं गृहवासार्थं पञ्जीकरणम् अनिवार्यं कृतम्। पर्यटनविभागः सुविधानुसारं प्रतिकक्षं भाटकं निर्धारयिष्यति। गृहवासार्थं विद्युत्, जलं च व्यावसायिकदरेण उपलभ्यते। यदि कश्चन व्यक्तिः स्वगृहस्य शून्यक्षेत्रे चालयति चेदपि तस्य पृथक् विद्युत्जलमापकं प्राप्तव्यं भविष्यति।

## हिमाचले ४ सहस्रगृहवासाः पञ्जीकृताः सन्ति

ये जनाः धारा ११८ इत्यस्य अन्तर्गतं सम्पत्तिं क्रीतवन्तः ते तस्मिन् गृहवासं चालयितुं न शक्ष्यन्ति। गृहवासस्य पञ्जीकरणशुल्कं ग्रामीणेषु नगरेषु च भिन्नं भविष्यति। पर्यटनविभागेन स्वप्रस्तावः सज्जीकृत्य अनुमोदनार्थं मन्त्रिमण्डलाय प्रेषितः। हिमाचले प्रायः ४ सहस्रगृहवासाः पञ्जीकृताः सन्ति। एते सर्वे नूतननियमानां व्याप्तिम् आगमिष्यन्ति।

## २००८ तमे वर्षे कार्यान्विता गृहवासनीतिः

हिमाचले गृहवासनीतिः २००८ तमे वर्षे निर्मिता। तत्कालीनसर्वकारेण युनां स्वरोजगारस्य उद्देश्यं कृत्वा एषा नीतिः आनीता आसीत्। पूर्वं गृहवासः त्रिषु कक्षेषु चालयितुं शक्यते स्म, पश्चात् ५ कक्षेषु वर्धितः।



सरदारपटेलविश्वविद्यालये बिरसामुण्डा जयन्त्यावसरे समामूहिक चित्रे

# भगवतः बिरसा मुंडावर्यस्य 150तमे जयन्त्यवसरे कार्यक्रमस्य आयोजनम्

हिमसंस्कृतवार्ताः- डॉ अमितशर्मा, मंडी। सरदारपटेलविश्वविद्यालये मंडी इत्यत्र भगवतः बिरसा मुंडावर्यस्य 150तमे जयंत्यवसरे, गुरुनानकदेवस्य च 555तमस्य प्रकटोत्सवस्य अवसरे च इतिहासविभागे विशेषकार्यक्रमः समायोजितः। आचार्यः ललितकुमार अवस्थी कुलपतिः, सरदारपटेलविश्वविद्यालयः मंडी भगवतः बिरसामुंडा- गुरु नानक देवस्य च जयन्तौ शुभकामनाः प्रददन् एतयोः जीवनाभ्यां प्रेरणाग्रहणस्य आह्वानं कृतम्। आचार्य अनुपमासिंहः प्रतिकुलपतिः, विभागाध्यक्षा इतिहासविभागः मुख्यातिथिरूपेण उपस्थिता आसीत्। कार्यक्रमस्य अध्यक्षता आचार्यः राजेशशर्मा अधिष्ठाता छात्र- कल्याणम् अकरोत्। सर्वप्रथमं भगवतः बिरसा मुंडा, गुरुनानक देवस्य चित्रयोः पुष्पाणि समर्प्य सर्वे अतिथयः छात्राश्च श्रद्धांजलिम् अर्पितवन्तः। कार्यक्रमसंयोजकः, सहायकाचार्यः इतिहासविभागः डॉ. राकेशकुमारशर्मा कार्यक्रमस्य रुपरेखां प्रस्तुतवान्। तेन बिरसा मुंडावर्यस्य जीवनस्य, तस्य संघर्षाणां वनवासीसमाजस्य उत्थानं प्रति तस्य भूमिकायाः विषये व्याख्यानं कृतम्। अस्मिन् अवसरे मुख्यातिथिः आचार्या अनुपमासिंह उक्तवती यत् बिरसा मुंडा न केवलं स्वसमाजस्य संघर्षे अपि तु भारतस्य स्वतंत्रता संग्रामेऽपि महत्त्वपूर्णं योगदानं कृतम्। तया बिरसा मुंडावर्यस्य साहसविषये वनवासी समुदायस्य अधिकारेभ्यः तस्य संघर्षे समाजे च अमूल्यभूमिकायां सविस्तरं विवेचनं कृतम्। कार्यक्रमस्य अध्यक्षः आचार्यः राजेश शर्मा उक्तवान् यत् बिरसा मुंडा 'उलगुलान' आंदोलनस्य माध्यमेन ब्रिटिशशासनविरुद्धं वनवासीसमाजस्य अस्मितायाः संस्कृतेश्च रक्षायै च संघर्षम् अकरोत्। सः शिक्षयति यत् सत्यस्य न्यायस्य च पथि अस्माभिः कस्यापि संकटस्य भीतिः न करणीया। डॉ. जगदीपवर्मा सहायकाचार्यः वनस्पतिविज्ञानविभागः, उक्तवान् यत् बिरसामुंडाजयन्ती आस्मान् प्रेरयति यत् समाजस्य क्षीणवर्गाणाम् अधिकारेभ्यः अस्माभिः एकत्रीभूय कार्यं करणीयम्। कार्यक्रमे डॉ. शिवान बीबी सहायक- आचार्यः प्रबन्धनविभागः, डॉ. जगदीपवर्मा सहायक- आचार्यः वनस्पतिविज्ञानविभागः, शोधार्थी सुरेखा, राहुलकुमारः, वेदकुमारसहितम् इतिहासविभागस्य विश्वविद्यालयस्य च अन्यविभागानां छात्रा उपस्थिताः आसन्।

# ECO Tourism: पर्यटनस्थल- सोलङ्गनालायाः कायाकल्पं भविष्यति, कोटित्रयं व्ययः भविष्यति, पर्यटकानां कृते उत्तमाः सुविधाः प्रदास्यन्ते

हिमसंस्कृतवार्ताः - मनाली। हिमाचलप्रदेशस्य कुल्लूमण्डलस्य प्रसिद्धं पर्यटनस्थलं सोलङ्गनालायाः कायाकल्पं भविष्यति। वनविभागः इको-पर्यटनस्य अन्तर्गतं सोलाङ्गनालाक्षेत्रस्य मुखं परिवर्तयितुं गच्छति। स्कीइंग, पैराग्लाइडिंग इत्येतयोः कृते प्रसिद्धं सोलङ्गनाला नूतनवर्णेन दृश्यते। अस्यां सम्पूर्णायां परियोजनायां वनविभागः त्रिकोटिभ्यः अधिकं धनं व्ययितुं गच्छति। पर्यटननगरस्य सौन्दर्यीकरणेन सह स्कीइंग- प्रवणता अधिकतया सज्जीकृता भविष्यति। एतदतिरिक्तम् अश्वारोहकाणां कृते पृथक् मार्गः निर्मितः भविष्यति। कुल्लु-मनाली-नगरस्य प्रसिद्धं पर्यटनस्थलं सोलङ्गनाला अस्ति। प्रतिवर्षं लक्षशः पर्यटकाः अत्र दर्शनार्थम् आगच्छन्ति। मनाली-लेह राजमार्ग-३ इत्यत्र स्थितं सोलङ्गनाला पर्यटननगरी मनालीतः १३ किलोमीटर दूरे अस्ति।



## पर्यटकानां प्रथमा रुचिः

एतद् स्थलम् पर्यटकानां प्रथमः विकल्पः अस्ति, हिमपातकाले अत्र पर्यटकानां प्रवाहः भवति। वनविभागः सोलङ्गनालाक्षेत्रस्य समतलक्षेत्रस्य इको-पर्यटनस्य अन्तर्गतं सौन्दर्यं कर्तुं गच्छति। एतदतिरिक्तं अत्र परितः वेष्टनकार्यमपि भविष्यति। तत्सह स्कीइंग- क्रीडायै स्कीक्रीडकानां प्रियप्रवणतायाः अपि कायाकल्पः भविष्यति। तस्य विकासः अपि उत्तमः भविष्यति। स्कीइंग-उत्साहिणः भविष्ये अधिकम् आनन्दं प्राप्तुं गच्छन्ति। इको- पर्यटनस्य अन्तर्गतं प्रसिद्धस्य धार्मिकस्थलस्य अञ्जनीमहादेवस्य कृते एकं पटलं निर्मितं भविष्यति, यः अश्वारोहकानाम् अपि सुविधाजनकः भविष्यति। अस्यां सम्पूर्णायां परियोजनायां त्रिकोटिभ्यः अधिका राशिः व्ययिता भविष्यति। एतादृशी परिस्थितौ सोलङ्गनालायां पर्यटकाः कृते अपि उत्तमाः सुविधाः प्राप्नुयुः।

**इको-पर्यटनस्य अन्तर्गतं सोलङ्गनालायां ३ कोटिरूप्यकाणां राशिः व्ययिता भविष्यति। सम्पूर्णस्य सोलाङ्गनालाक्षेत्रस्य कृते अस्य विकासः भविष्यति। अधुना पूर्वापेक्षया अधिकं सुन्दरं दृश्यते पर्यटकानां कृते स्कीइंग, पैराग्लाइडिंग, ट्रैक इत्यादीनाम् उत्तमसुविधाः प्राप्यन्ते। -एञ्जल चौहान,वनमण्डलाधिकारी, कुल्लू।**

# KKSU Ramtek: कविकुलगुरु- कालिदास- संस्कृतविश्वविद्यालयाय राज्यस्तरीय- अन्तर्विश्वविद्यालयीय- इन्द्रधनुषयुवामहोत्सवे पोस्टरनिर्माण- प्रतियोगितायां द्वितीयपुरस्कारः




हिमसंस्कृतवार्ताः- रामटेकः। कविकुलगुरु- कालिदास- संस्कृतविश्वविद्यालयः, 'इन्द्रधनुष्य- २०२४' महाराष्ट्रराज्य- अन्तर्विश्वविद्यालयीय- युवामहोत्सवप्रतियोगितायां छात्रकल्याणनिदेशकस्य डॉ. जयवन्तचौधरी इत्यस्य यशस्वी नेतृत्वे विश्वविद्यालयसङ्घः सर्वासु स्पर्धासु उत्साहेन विलक्षणतया च भागं गृहीतवान्। अस्मिन् राज्यस्तरीययुवामहोत्सवे इन्द्रधनुष २०२४ सांस्कृतिकप्रतियोगितायां कविकुलगुरु- कालिदास- संस्कृतविश्वविद्यालयस्य संघेन रामटेकेन पोस्टरनिर्माणकलायां द्वितीयस्थानं प्राप्तम्। विश्वविद्यालयेन सम्बद्धा नटराजकला- सांस्कृतिककेन्द्रस्य छात्रा अनुराधा मातांकर स्वप्रशिक्षकस्य रविन्द्रहरदासस्य मार्गदर्शने इयमुपलब्धिः प्राप्ता।

इन्द्रधनुष- २०२४ इत्यस्मिन् महाराष्ट्रस्य कुलम् २४ विश्वविद्यालयाः भागं गृहीतवन्तः। डॉ. पंजाबराव देशमुख कृषिविश्वविद्यालयः, अकोला द्वारा आयोजितायां प्रतियोगितायां प्रायशः १००० छात्रैः भागं स्वीकृतम्। कविकुलगुरु- कालिदास- विश्वविद्यालयसंघस्य कुलपतिना प्रो हरेरामत्रिपाठी, प्रतिकुलपतिना डॉ. देवानन्दशुक्ल इत्येताभ्याम् चाभिनन्दनं कृतम्।

## विश्वबन्धुत्वस्य भावम् उपदिशति संस्कृतम्- स्वामिजनार्दनाचार्यः

# चेतसः आत्मनः परिष्करणम् एव संस्कृतम्, विश्वविकासस्य चर्चायां संस्कृतस्य विशिष्टं स्थानम्




**हिमसंस्कृतवार्ताः- लखनऊ, 16 नवंबर।** उत्तरप्रदेशसंस्कृतसंस्थानेन सञ्चालितम् ऑनलाइन- संस्कृतसम्भाषणकक्षायां विशेषप्रेरणासत्रस्य आयोजनम् अभवत्, यस्मिन् श्रीनिवाससंस्कृतविद्यापीठस्य, दिल्लीनगरस्य अध्यक्षः स्वामिजनार्दनाचार्यः मुख्यवक्तृरूपेण सम्बोधितवान्। स्वामी जनार्दनाचार्यः स्वस्य प्रेरणादायके सम्बोधने संस्कृतस्य महत्त्वम् उक्तवान्, संस्कृतं न केवलं भाषा, अपि तु विश्वबन्धुत्वस्य भावम् उपदिशति। मनसः आत्मनः परिष्कारः इति उक्त्वा सः विश्वविकासे संस्कृतस्य विशिष्टं स्थानं वर्तते इति उक्तवान्। संस्थानस्य प्रशंसां कुर्वन् सः अवदत् यत् संस्कृतभाषायाः प्रचारार्थं न केवलं भारते अपि तु विदेशेषु विविधैः संस्थाभिः अपि प्रयत्नाः क्रियन्ते, येषु एषा संस्था श्रेष्ठेषु अन्यतमः अस्ति। सत्रस्य आरम्भे छात्रा मन्त्रिता सरस्वतीवन्दना, हिमानी अनुभवकथनं, लीला- कुमुद च संस्कृतसंवादमाध्यमेन मनोहरप्रस्तुतिं दत्तवन्तः। समन्वयकेन धीरजमैठानी स्वागतभाषणं प्रास्ताविकभाषणं च कृत्वा कार्यक्रमम् अग्रे वर्धितवान्। प्रशिक्षिका सविता कुशलतया सञ्चालनं कृतवती तु प्रशिक्षिका श्वेता सर्वेभ्यः धन्यवादं प्रदत्तवती। अस्मिन् संस्कृतविषये प्रेरणादायके सत्रे प्रतिभागिनः न केवलं भाषायाः अभ्यासं कृतवन्तः अपितु तस्याः आध्यात्मिकं सांस्कृतिकं च महत्त्वं अनुभवन्ति स्म। कार्यक्रमे प्रशिक्षकः महेन्द्रः, अंशुः अपि च प्रशिक्षिका अनीता उपस्थिता आसीत्।

# अक्षयकुमारस्य भारत-पाकिस्तान- वायुयुद्धाधारितं देशभक्तिपूर्णं

## चलच्चित्रम् अस्मिन् दिने प्रदर्शितं भविष्यति



हिमसंस्कृतवार्ताः- जगदीश डाभी। (मुम्बई) प्राप्तवार्तानुसारम् अधुना एव खेल खेल इति चलच्चित्रे बॉलीवुडनायकः अक्षयकुमारः दृष्टः। अस्मात् चलच्चित्रात् बहु अपेक्षितम् आसीत्। परन्तु एतत् चलच्चित्रं बॉक्स ऑफिसमध्ये अपेक्षां न पूरितवान्। एतस्य निष्फलता अनन्तरम् अक्षयकुमारः अधुना देशभक्तिपूर्णे चलच्चित्रे द्रष्टुं गच्छति। १९६५ तमे वर्षे भारत- पाकिस्तान- वायुयुद्धे पाकिस्तानस्य सरगोधा- वायुस्थानके भारतेन कृतस्य प्रतिकारात्मक-आक्रमणस्य आधारेण एतत् चलच्चित्रं निर्मितम् अस्ति। वयं स्काई फोर्स् इति चलच्चित्रस्य विषये वदामः। स्काई फोर्स इति विमान-एक्शन-चलच्चित्रम्। अस्मिन् चलच्चित्रे अक्षयकुमारेण सह मुख्यभूमिकायां सारा अली खानः दृश्यते। अस्मिन् चलच्चित्रे वीर पहाडिया, निमरत कौरः च महत्त्वपूर्णा भूमिकासु दृश्यन्ते। अस्मिन् वर्षे एतत् चलच्चित्रं प्रदर्शितं भवितुम् आसीत्। परन्तु अधुना एव चलच्चित्रं स्थगितम् अस्ति। अधुना च चलच्चित्रस्य नूतना प्रदर्शनतिथिः घोषिता अस्ति। अक्षयस्य स्काई फोर्स २०२५ तमे वर्षे गणतन्त्रदिवससप्ताहे प्रदर्शितं भविष्यति।

# पदक्षेपः अमेरिकया ग्रहणीयः इति रष्यायाः लाव्रोवस्य ट्रम्प-प्रभुत्वेन सह चर्चाविषये भणनम्

राष्ट्रपति-निर्वाचने डोनाल्डट्रम्पस्य विजयानन्तरं रष्यादेशस्यविदेश मन्त्री सर्गेय-लाव्रोवः भणीतवान् यत् रष्या संवादं न स्थगितवती तथा च पदक्षेपः अमेरिकया ग्रहणीयः। लाव्रोवः इतोऽपि प्रतिपादितवान् - "[ट्रम्प-प्रशासनात्] अस्मदीयाः काश्चिदपि अपेक्षाः न सन्ति, कामपि कल्पनां न कुर्मः"। पूर्वं क्रेम्लिनेन निगदितं यत् रष्याराष्ट्रपतिः व्लादिमीर-पुतिनः युक्रेण-विषये ट्रम्पेन सह चर्चायै सज्जः।



हिमसंस्कृतवार्ताः ईदरधीरजः


# संस्कृतविद्यास्थानानि- २९

## ऋग्वेदस्य आरण्यके-

१) ऐतरेय-आरण्यकम्– एतस्य पञ्च भागाः वर्तन्ते। ते अपि आरण्यकनाम्ना एव उच्यन्ते। आद्यानां त्रयाणाम् आरण्यकानाम् आचार्यः ऐतरेयब्राह्मणस्य महीदास ऐतरेयः एव। चतुर्थस्य आरण्यकस्य रचयिता आश्वलायनः तथा पञ्चमस्य शौनकर्षिः इति वदन्ति। पञ्चसु प्रथमारण्यके महाव्रतस्य विवेचनं वर्तते। ऐतरेयब्राह्मणे उक्तस्य गवामयनस्य एव एषः अंशः। द्वितीयारण्यके आद्येषु त्रिषु खण्डेषु उक्थम्, निष्कैवल्यम्, प्राणविद्या, पुरुषः इत्यादीनां विवेचनम् अस्ति। एतस्य चतुर्थखण्डात् षष्ठखण्डपर्यन्तं त्रयः खण्डाः ऐतरेयोपनिषद् इति नाम्ना प्रसिद्धाः। तृतीयारण्यकस्य संहितोपनिषद् इति अन्यत् नाम अस्ति। एतस्मिन् संहितापाठः, क्रमपाठः , पदपाठः तथा स्वरव्यञ्जनादीनां विवेचनं लभ्यते। चतुर्थारण्यं लघुतमम्। तत्र महाव्रतस्य पञ्चमदिने प्रयोज्यानां महानाम्नी-ऋचां विवेचनम् अस्ति। पञ्चमारण्यके प्राणविद्यायाः विवरणम् अस्ति।

२) शाङ्खायनारण्यकम्– एतत् ऋग्वेदस्य शाङ्खायनशाखासम्बद्धम् आरण्यम्। एतस्यैव अपरं नाम कौषीतकिः आरण्यकम्। शाङ्खायनाचार्यः एतस्य आरण्यकस्य रचयिता। सः स्वस्य गुरोः कौषीतकेः नाम एतस्मै ग्रन्थाय दत्तवान् इति कथ्यते।

आरण्यकेऽस्मिन् पञ्चदश अध्यायाः १३७ खण्डाश्च सन्ति। प्रथमे तथा द्वितीये अध्याये महाव्रतस्य वर्णनम् अस्ति। पुनश्च द्वितीये, तृतीये च क्रमशः मृत्योः पश्चात् जीवस्य मार्गः परब्रह्मणः स्वरूपं च वर्णितम्। चतुर्थे तथा पञ्चमे आत्मैक्यं, ब्रह्मतत्त्वस्य च भिन्नभिन्नप्रकारकाः व्याख्याः सन्ति। तृतीयाध्यायात् षष्ठाध्यायपर्यन्तं आरण्यकभागः कौषीतक्युपनिषद् इति नाम्ना प्रसिद्धः अस्ति। सप्तमाष्टमौ अध्यायौ संहितोपनिषद् इति नाम्ना ख्यातौ। नवमाध्याये प्राणविद्या, दशमे अग्निहोत्रस्य आध्यात्मिकरूपम्, एकादशे मृत्योः निवारणार्थं विशेषयागस्य विधानं, स्वप्नफलानि, अनिष्टनिवारणाय शान्तिकर्म, द्वादशे बिल्वफलात् मणिनिर्माणम्, त्रयोदशे ब्रह्मविषयकश्रवणमननार्थं शुद्धिः तपस्या श्रद्धा एतासां महत्त्वम्, चतुर्दशे "अहं ब्रह्मास्मि" इत्यस्य महावाक्यस्य विवरणम् इत्येते विषयाः सन्ति। चतुर्दशाध्याये केवलं मन्त्रद्वयम् अस्ति। तयोः 'अहं ब्रह्मास्मि' एतन्महावाक्यं विवृतम्। पञ्चदशेध्याये आचार्याणां परम्परा दत्ता अस्ति। ब्रह्मणः आरभ्य कहोलः कौषीतकिः तथा अन्ते च शाङ्खायनः एवम् आचार्यपरम्परा उक्ता।



## आरण्यकस्यैतस्य वैशिष्ट्यानि–

क) अग्निहोत्रस्य भौतिकस्वरूपस्य अपेक्षया आध्यात्मिकं स्वरूपं विशदीकृतम्। बाह्यस्य अग्निहोत्रस्य अपेक्षया आभ्यन्तराग्निहोत्रं महत्त्वपूर्णम्। आभ्यन्तरमात्मतत्त्वम् अविदित्वा यः जुहोति सः भस्मनि एव जुहोति। सर्वाः देवताः शरीराभ्यन्तरे एव प्रतिष्ठिताः। आध्यात्मिकेन अग्निहोत्रेण तेषां सर्वेषां तृप्तिः जायते।

वेदान्तदर्शनस्य द्वे महावाक्ये तत्त्वमसि तथा अहं ब्रह्मास्मि उभेऽपि एतस्मिन्नारण्यके विद्येते। यदयमात्मा स एष तत्त्वमसि इत्यात्मावगम्योहं ब्रह्मास्मि।

ख) अहं ब्रह्मास्मि इत्यस्य महत्त्वम्– एतन्महावाक्यम् ऋचां मूर्धा, यजुषाम् उत्तमाङ्गम्, साम्नां शिरः अथर्वणस्य च मुण्डम् अस्ति, तम् अविज्ञाय वेदाध्ययनं नाम वेदस्य शिरश्छेदनम् एव इति उक्तम्।

ग) सार्थवेदाध्ययनस्य महत्त्वम्– अर्थविहीनं वेदाध्ययनं कुर्वाणः स्थाणुः एव इति उक्तम्–

**स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम्।**
**योऽर्थज्ञ इत्सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा।।**

हिमसंस्कृतवार्ताः-श्री तोडकर अभिजित् 9145908156

---

डॉ. विवेक शर्मा, जोगिन्द्रनगरम्,
हिमसंस्कृतवार्ताः

## सामान्यज्ञानप्रश्नोत्तरी

### सामान्यज्ञानम्

प्रश्न.1 विश्वस्य प्राचीनतमा भाषा का अस्ति?
उत्तरः - संस्कृतभाषा।
प्रश्न. 2 विश्वस्य दीर्घतमा नदी का अस्ति?
उत्तरः - नीलनदी, अफ्रीकादेशे।
प्रश्न. 3 भारतस्य प्रथमः प्रधानमन्त्री कः आसीत्?
उत्तरः - पण्डितजवाहरलालः नेहरू।
प्रश्न. 4 भारतस्य संविधानस्य निर्माणे कति वर्षाणि गतानि?
उत्तरः - त्रीणि वर्षाणि (२ वर्षाणि, ११ मासाः, १८ दिनानि)।
प्रश्न. 5 भारते ताजमहलम् कुत्र स्थितम् अस्ति?
उत्तरः - आगरायाम्, उत्तरप्रदेशे।

### संस्कृतज्ञानम्

प्रश्न.1 नमस्कारः इति पदस्य सन्धिः विच्छेदः किम्?
उत्तरम्- नमः + कारः।
प्रश्न.2 घ् वर्णस्य उच्चारणस्थानं किम्?
उत्तरम्- कण्ठः।
प्रश्न. 3. सीतारामौ इत्यत्र कः समासः?
उत्तरम्- द्वन्द्वः।
प्रश्न.4 कस्यै इत्यस्य पदपरिचयं देयम्।
उत्तरम्- स्त्रीलिङ्गम् किम् शब्दः चतुर्थीविभक्तिः एकवचनम्।
प्रश्न.5 संस्कृते समयः '04:45' भवति---
उत्तरम्- पादोन पञ्च वादनम्

---

## टाइटैनिक / Titanic

*हास्यकणिका विशेषज्ञा- विदुषी अग्रवाल*
*प्रेरणास्रोतः- महाभागः महेन्द्रमिश्रमहोदयः*

Titanic शब्दे यदि c वर्णस्य स्थाने kkk आसीत्, तर्हि Titanic कदापि न निमज्जति। किमर्थम्?
हिंदीभाषायाम् एका सूक्ति अस्ति- "डूबते को तिनके (तीन kkk) का सहारा होता है।" अत एव।

---



मार्गशीर्षसंक्रान्त्याः अवसरे सूर्यः वृश्चिकराशिं प्रविशति । मार्गशीर्षसंक्रान्तिः १६ नवम्बर २०२४ दिनाङ्के गुरुवासरे २५:१८ मिनिट् वादने प्रारभ्यते। ३० मुहूर्तिः - अस्याः संक्रान्तेः शुभकालः परदिने मध्याह्नपर्यन्तं स्थास्यति ।

## '१६ नवम्बर् दिनाङ्कः राष्ट्रीयप्रेसदिवसः

प्रतिवर्षं '१६ नवम्बर्' दिनाङ्के राष्ट्रियप्रेसदिवसः आचर्यते । अयं दिवसः भारते स्वतन्त्रस्य उत्तरदायित्वस्य च पत्रिकायाः उपस्थितेः प्रतीकः अस्ति । अद्यत्वे विश्वस्य प्रायः ५० देशेषु प्रेस काउन्सिल अथवा मीडिया काउन्सिल इति अस्ति । भारते प्रेसस्य नाम 'वाचडॉग्' इति, प्रेस काउन्सिल इण्डिया 'नैतिक वॉचडॉग्' इति च उक्तम् अस्ति। राष्ट्रियपत्रिकादिवसः पत्रिकायाः स्वतन्त्रतां, उत्तरदायित्वं च प्रति अस्माकं ध्यानं आकर्षयति। प्रथमेन प्रेस-आयोगेन भारते प्रेस-स्वतन्त्रतायाः रक्षणं, पत्रकारितायाः उच्च-मानकानां निर्धारणं च इति उद्देश्यं कृत्वा प्रेस-परिषदः परिकल्पना कृता आसीत् ।



फलतः १९६६ तमे वर्षे जुलै-मासस्य ४ दिनाङ्के भारते प्रेस-परिषदः स्थापना अभवत्, यस्याः औपचारिककार्यं १९६६ तमे वर्षे नवम्बर्-मासस्य १६ दिनाङ्कात् आरब्धम् । ततः अद्यपर्यन्तं प्रतिवर्षं नवम्बरमासस्य १६ दिनाङ्कः 'राष्ट्रीयप्रेसदिवसः' इति आचर्यते।



## वाराणसीनगरस्य प्रमुखनदीनां घाटेषु आचरिता देवदीपावली

हिमसंस्कृतवार्ताः। उत्तरप्रदेशस्य कार्तिकपूर्णिमावसरे वाराणसीनगरस्य प्रमुखनदीनां घाटेषु देवदीपावली आचरिता। उपराष्ट्रपति जगदीप धनखडेन वाराणस्यां नमो घाटस्य उद्घाटनं राज्यपालः आनंदीबेनपटेलः, मुख्यमंत्री योगी आदित्यनाथः किञ्च केन्द्रीय मंत्रिणः हरदीपसिंहपुरिनः उपस्थितौ कृतम्। तदनन्तरं ८४ घाटेषु ११ लक्षं दीपं प्रज्वलयित्वा गङ्गा आरती, लेजरप्रदर्शनं, हरितआतिशबाजी च आरब्धा । सायंकाले सम्पूर्णे वाराणसीनगरे १७ लक्षाधिकाः मृत्तिकादीपाः प्रज्वलिताः। नमोघाट् वाराणस्याः प्रथमः आदर्शघटः इति अपि कथ्यते । अयं घाटः नमोघाटतः आदिकेशवघाटपर्यन्तं प्रायः १.५ किलोमीटर् यावत् विस्तृतः अस्ति । अद्वितीयं "नमस्ते"-शिल्पं, अन्तर्राष्ट्रीय-मानक-सुविधाः च अस्मिन् नूतने गन्तव्ये पर्यटकान् आकर्षयन्ति । जलेन, स्थलेन, वायुमार्गेण च गन्तुं शक्यः अयं घाटः वाराणसीनगरस्य प्रथमः घाटः अस्ति यत्र हेलिकॉप्टर्-यानानि अवतरितुं शक्नुवन्ति । अस्मिन् प्लवमानं सीएनजी-स्थानकं, मुक्तवायुनाट्यगृहं, सेतुः, स्नानक्षेत्रयुक्तं प्लवमानं जेट्टी, परिवर्तनकक्षाः च सन्ति ।

---

||ॐ||
**वन्दे संस्कृतमातरम्**
**"लौकिकन्यायकोशः" (९६)**

## मरुमरीचिकान्यायः

मरुस्थले स्थित्वा पश्यामः चेत् कदाचित् दूरे जलम् अस्ति इव भाति।परन्तु तत्र गत्वा पश्यामः चेत् जलज्ञानं भ्रमः इति ज्ञायते। एवं वस्तुनः अभावेऽपि भासमानताम् आश्रित्य प्रवृत्तः अयं न्यायः।
मरुमरिचिका यत्र भासते तत्र जलभ्रमेण मृगाः धावन्ति पश्चात् तत्र जलम् अप्राप्य दुःखम् अनुभवन्ति। एवं जीवने भ्रमवशात् प्रवृत्तिः भवति चेदपि अनन्तरं सा नश्यति। "नायं मम प्रस्तावो मृगतृष्णिकेव विषादाय कल्पेत्"।(अभिज्ञानशाकुन्तले७)
डा. वर्षा प्रकाश टोणगांवकर
पुणे/ महाराष्ट्रम्